CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 409

Title Viṣṇu sūkta

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 409. Subject : Vedic ~~Rit.~~ Lit.

Title : Viṣṇu sukta.

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 7.1" by 4.1" Extent : 5 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks :

॥श्री॥ श्रीगणेशाय नमः॥ अथ विष्णुसूक्तस्य पदानि लिख्यते॥ ॥ अतः
देवाः अवंतु नः यतः विष्णुः वि॰चक्रमे पृथिव्याः सप्त धाम॰भिः
इदं विष्णुः वि चक्रमे त्रेधा नि दधे पदं सं॰ऊढं अस्य पांसुरे
त्रीणि पदा वि चक्रमे विष्णुः गोपाः अदाभ्यः अतः धर्माणि धार
यन् विष्णोः कर्माणि पश्यत यतः व्रतानि पस्प[illegible]शे इंद्रस्य यु
ज्यः सखा तत् विष्णोः परमं पदं सदा पश्यंति सूरयः दिविऽइव
चक्षुः आ॰ततं तत् विप्रासः विपन्यवः जागृ॰वांसः सं इंधते विष्णोः
यत् परमं पदं १ दीर्घतमाः [illegible]
इमे वा मोद इति तान् प्र॰[illegible] विष्णोः नु कं वीर्याणि प्र वोचं १
यः पार्थिवानि वि॰ममे रजांसि यः अस्कभायत् उत्॰तरं सध॰
स्थं वि॰चक्रमाणः त्रेधा उरु॰गायः प्र तत् विष्णुः स्तवते वीर्येण
मृगः न भीमः कुचरः गिरि॰स्थाः यस्य उरुषु त्रिषु वि॰क्रमणेषु अ
धि॰क्षियंति भुवनानि विश्वा प्र विष्णवे शूषं एतु मन्म गिरि॰क्षि
ते उरु॰गायाय वृष्णे यः इदं दीर्घं प्र॰यतं सध॰स्थं एकः वि॰ममे
त्रि॰भिः इत् पदेभिः यस्य त्री पूर्णा मधुना पदानि अक्षीयमाणा स्व
धया मदंति यः ऊंइति त्रि॰धातु पृथिवीं उत द्यां एकः दाधार भुव
नानि विश्वा तत् अस्य प्रियं अभि पाथः अश्यां नरः यत्र देव॰यवः
मदंति उरु॰क्रमस्य सः हि बंधुः इत्था विष्णोः पदे परमे मध्वः उत्सः
ता वां वास्तूनि उश्मसि गमध्यै यत्र गावः भूरि॰शृंगाः अयासः
अत्र अह तत् उरु॰गायस्य वृष्णः परमं पदं अव भाति भूरि
२॰ अंधसः धिषणा॰पते महे शूराय विष्णवे च अर्चत या सानु
नि पर्वतानां अदाभ्या महः तस्थतुः अर्वताइव साधुना त्वेषं
इत्था सं॰अरणं शिमी॰वतोः इंद्राविष्णूइति सुत॰पाः वां उरुष्यति

या मर्त्याय प्रति०धीयमानं इत् कृशानोः अस्तुः असनां उरुष्य
थः ता ईं वर्द्धंति मही अस्य पौंस्यं नि मातरा नयति रेतसे भुजे
दधाति पुत्रः अवरं परं पितुः नाम तृतीयं अधि रोचने दिवः तत्०
तत् इत् अस्य पौंस्यं गृणीमसि इनस्य त्रातुः अवृकस्य मीळ्हुषः
यः पार्थिवानि त्रि०भिः इत् विगाम०भिः उरु क्रमिष्ट उरु०गायाय जी
वसे द्वे इति इत् अस्य क्रमणे इति स्वः०दृशः अभि०ख्याय मर्त्यः भुर
ण्यति तृतीयं अस्य नकिः आ दधर्षति वयः चन पतयंतः पतत्रिणः
चतुः०भिः साकं नवतिं च नाम०भिः चक्रं न वृत्तं व्यतीन् अवीवि
पत् बृहत्०शरीरः वि०मिमानः ऋक्व०भिः युवा अकुमारः प्रति एति
आ०हवं ॥ भव मित्रः न शेव्यः घृत०आसुतिः विभूत०द्युम्नः एव० २
याः ऊँ इति स०प्रथाः अध ते विष्णो इति विदुषा चित् अर्द्ध्यः स्तोमः
यज्ञः च राध्यः हविष्मता यः पूर्व्याय वेधसे नवीयसे सुमत्०जानये

विष्णवे ददाशति यः जातं अस्य महतः महि ब्रवत् सः इत् ऊँ इति श्रवः०
भिः युज्यं चित् अभि असत् तं ऊँ इति स्तोतारः पूर्व्यं यथा विद ऋतस्य
गर्भं जनुषा पिपर्तन आ अस्य जानंतः नाम चित् विवक्तन महः
ते विष्णो इति सु०मतिं भजामहे तं अस्य राजा वरुणः तं अश्विना क्र
तुं सचंत मारुतस्य वेधसः दाधार दक्षं उत्०तमं अहः०विदं व्रजं च
विष्णुः सखि०वान् अप०ऊर्णुते आ यः विवाय सचथाय दैव्यः इं
द्राय विष्णुः सु०कृते सुकृत्०तरः वेधाः अजिन्वत् त्रि०सधस्थः आर्यं
ऋतस्य भागे यजमानं आ अभजत् ॥ सं वां कर्मणा सं इषा हिनोमि
इंद्राविष्णू इति अपसः पारे अस्य जुषेथां यज्ञं द्रविणं च धत्तं अ
रिष्टैः नः पथि०भिः पारयंता या विश्वासां जनितारा मतीनां इंद्रावि
ष्णू इति कलशा सोम०धाना प्र वां गिरः शस्यमानाः अवंतु प्र
स्तोमासः गीयमानासः अर्कैः इंद्राविष्णू इति मदपती इति मद०पती

मदानां आ सोमं यातं द्रविणोइति दधाना सं वां अंजंतु अक्तु॰भिः म
तीनां सं स्तोमासः शस्यमानासः उक्थैः आ वां सश्वासः अभिमाति॰ष
हः इंद्राविष्णूइति सध॰मादः वहंतु जुषेथां विश्वा हवना मतीनां
उप ब्रह्माणि शृणुतं गिरः मे इंद्राविष्णूइति तत् पनयाय्यं वां सो
मस्य मदे उरु चक्रमाथेइति अकृणुतं अंतरिक्षं वरीयः अप्रथतं
जीवसे नः रजांसि इंद्राविष्णूइति हविषा वावृधाना अग्र॰अद्वाना न
मसा रात॰हव्या घृतासुतीइतिघृत॰आसुती द्रविणं धत्तं अस्मेइति
समुद्रः स्थः कलशः सोम॰धानः इंद्राविष्णूइति पिबतं मध्वः अ
स्य सोमस्य दस्रा जठरं पृणेथां आ वां अंधांसि मदिराणि अ
ग्मन् ॥ उप ब्रह्माणि शृणुतं ॥ हवं मे उभा जिग्यथुः न परा जयेथेइ
इति न परा जिग्ये कतरः चन एनोः इंद्रः च विष्णोइति यत् अप
स्पृधेथां त्रेधा सहस्रं वि तत् ऐरयेथां ५ परः मात्रया तन्वा वृधान

न ते महि॰त्वं अनु अश्नुवंति उभेइति ते विद्म रजसीइति पृथिव्याः
विष्णोइति देव त्वं परमस्य वित्से न ते विष्णोइति जायमानः न जातः
देव महिम्नः परं अंतं आप उत् अस्तभ्नाः नाकं ऋष्वं बृहंतं दाध
र्थ प्राचीं ककुभं पृथिव्याः इरावतीइति इरा॰वती धेनुमतीइतिधेनु॰
मती हि भूतं सुयवसिनीइतिसु॰यवसिनी मनुषे दशस्या वि अस्त
भ्नाः रोदसीइति विष्णोइति एतेइति दाधर्थ पृथिवीं अभितः मयूखैः
उरुं यज्ञाय चक्रथुः ऊंइति लोकं जनयंता सूर्यं उषासं अग्निं दास
स्य चित् वृष॰शिप्रस्य मायाः जघ्नथुः नरा पृतनाज्येषु इंद्राविष्णू
इति दृंहिताः शंबरस्य नव पुरः नवतिं च श्नथिष्टं शतं वर्चिनः स
हस्रं च साकं हथः अप्रति असुरस्य वीरान् इयं मनीषा बृहती बृ
हंता उरु॰क्रमा तवसा वर्धयंती ररे वां स्तोमं विदथेषु विष्णोइति

पिन्वतं इषः वृजनेषु इंद्र वषट् ते विष्णो इति आसः आ कृणोमि तत्
मे जुषस्व शिपि॰विष्ट हव्यं वर्द्धंतु त्वा सुस्तुतयः गिरः मे ० ६ नु
मर्त्तः दयते सनिष्यन् यः विष्णवे उरु॰गायाय दाशत् प्र यः सत्राचा
मनसा यजाते एतावंतं नर्यं आ॰विवासात् त्वं विष्णो इति सु॰मतिं वि
श्व॰जन्यां अप्र॰युतां एव॰यावः मतिं दाः पर्चः यथा नः सुवितस्य भू
रेः अश्व॰वतः पुरु॰चंद्रस्य रायः त्रिः देवः पृथिवीं एषः एतां वि चक्रमे
शत॰अर्चसं महि॰त्वा प्र विष्णुः अस्तु तवसः तवीयान् त्वेषं हि अस्य
स्थविरस्य नाम वि चक्रमे पृथिवीं एषः एतां क्षेत्राय विष्णुः मनुषे दश
स्यन् ध्रुवासः अस्य कीरयः जनासः उरु॰क्षितिं सु॰जनिमा चकार
प्र तत् ते अद्य शिपि॰विष्ट नाम अर्यः शंसामि वयुनानि विद्वान् तं ४
त्वा गृणामि तवसं अतव्यान् क्षयंतं अस्य रजसः पराके किं इत् ते

विष्णो इति परि॰चक्ष्यं भूत् प्र यत् ववक्षे शिपि॰विष्टः अस्मि मा वर्पः
अस्मत् अप गूहः एतत् यत् अन्य॰रूपः सं॰इथे बभूथ ० ७

गव
नद